अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् .......................

**Paper Code**
**BV-203**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**
**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : द्वितीयम्)**
**तृतीयपत्रम् – संस्कृत साहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम् :** इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (खण्ड – क)
## (शुकनोसोपदेशः) 20 अङ्काः

**प्रश्नः1– शुकनासोपदेशस्य कथासारं स्वशब्दैर् लिखन्तु।** **(1X5=05)**

*अथवा*

**शुकनासोपदेशस्य केचित् सुभाषितरत्नानि सव्याख्यासहितानि लेखनीयानि।**

**प्रश्नः2– बाणभट्टस्य गद्यवैशिष्ट्यं प्रतिपादयत।** **(1X5=05)**

*अथवा*

**बाणभट्टस्य जीवनचरित्रं लिखत।**

**प्रश्नः3– अधोलिखिलेषु गद्येषु कयोश्चिद् द्वयोः प्रसङ्गं व्याख्यां कुरुत –** **(2X5=10)**

(क) नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुष मत्यासङ्गो विषयेषु। भावदृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः।

(ख) इयं हि खड्गमण्डलोत्पलवनविश्रमभ्रमरी लक्ष्मीः क्षीरसागरात्पारिजात पल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता।

(ग) अमृतसहोदरापि कटुपविपाका, विग्रहवत्यक्ष्यप्रत्यक्षदर्शना, पुरुषोत्तमरतापि खलजनप्रिया, रेणुमयीव स्वच्छमपि कलुषी करोति। यथायथा चेय चपला दीप्यते तथातथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

## (खण्ड – ख)
## (उरुभङ्गम्) 20 अङ्काः

**प्रश्नः4– त्रिषु द्वयोः समाधानम्।** **(2X5=10)**

(क) उरुभङ्गस्य कथासारं लिखन्तु।
(ख) महाकविभासस्य जीवनपरिचयं तथा नाट्यकलापरिचयं संक्षेपेण लिखत।
(ग) दुर्योधनस्य चरित्रचित्रणं कुरुत।

**प्रश्नः5– पृष्ठेषु द्वयोश्श्लोकयोर्व्याख्या ।** **(2X5=10)**

(क) एते परस्परशरर्हृतजीवितानां, देहै रणाजिरमही समुपाश्रितानाम्।
कुर्वन्ति चात्र पिशितार्द्रमुखा विहङ्गा, राज्ञां शरीरशिशिलानि विभूषणानि।।

(ख) रूधिरसरितो निस्तीर्यन्ते हतद्विपसङ्क्रमा,
नृपतिरहितैः स्रस्तैः सूतैर्वहन्ति रथान् हयाः।
पतितशिरसः पूर्वाभ्यासाद् द्रवन्ति कबन्धकाः
पुरुणरहिता मत्ता नागा भ्रमन्ति यतस्ततः।।

(ग) स्पृष्ट्वा खाण्डवधूमरञ्जितगुणं संशप्तकोप्सादनं,
स्वर्गा क्रन्दहरं निवातकवचप्राणोपहारं धनुः।
पार्थेनास्त्रबलान्महेश्वररणक्षेपावशिष्टैः शरैर्
दर्पोत्सिक्तवशा नृपा रणमुखे मृत्योः प्रतिग्राहिताः।।

## (खण्ड – ग)
## (काव्यदीपिका) 15 अङ्काः

**प्रश्नः6– रोद्ररसस्य स्वरूपं सोदाहणं लिखत।**

**प्रश्नः7– अविवक्षितवाच्यध्वनेः स्वरूपं सोदाहणं लिखत।**

**प्रश्नः8– के च व्यभिचारिभावाः? सश्लोकं लिखन्तु। तथा च आद्यपञ्चानां परिभाषाऽपि लेखनीया।**

**प्रश्नः9– कोऽयं नाम रसः? के च विभावादयः? सव्याख्या स्पष्टीकुर्वन्तु।**

**प्रश्नः10–चित्रकाव्यस्य स्वरूपं सभेदं सोदाहरणं लिखत।**

## (खण्ड – घ)
## (आयुर्वेदः) 15 अङ्काः

**प्रश्नः11– अधोलिखितेषु कयोरपि द्वयोरंशयोर्यथायथं व्याख्यानं कुरुत।** **(2X5=10)**

(क) न पर्युषितमन्यत्र मांसरहितकशुष्कशाकफलभक्ष्येभ्यः, नाशेषभुक् स्यादन्यत्र दधिमधुलवणसक्तुसर्पिभ्यः, न नक्तं दधि भुञ्जीत, न सक्तूनेकानश्नीयान्न निशि न भुक्त्वा न बहून्न द्विर्नोदकान्तरितात्, न छित्वा द्विजैर्भक्षयेत्।

(ख) नाधीरो नात्युच्छ्रितसत्तवः स्यात्, नाभृतभृत्यः, नाविश्रब्धस्वजनः, नैकः सुखी, न दुःखशीला – चारोपचारः, न सर्वविश्रम्भी, न सर्वाभिशङ्की, न सर्वकालविचारी।

(ग) न कार्यकालमतिपातयेत्, नापरीक्षितमभिनिविशेत, नेन्द्रियवशगः स्यात्, न चञ्चलं मनोऽनुभ्रामयेत्, न बुद्धीन्द्रियाणामतिभारमादध्यात् न चातिदीर्घसूत्री स्यात्, न क्रोधहर्षावनुविदध्यात्, न शोकमनुवसेत्।।

**प्रश्नः12– सद्वृत्तस्योपरि लघुर्लेखो लेखनीयः।** **(1X5=05)**

--------------x--------------